श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ४०

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ४०

*पूतनामोक्षवर्णनम्*

तदनु नन्दममन्दशुभास्पदं
    नृपपुरीं करदानकृते गतम्।
समवलोक्य जगाद भवत्पिता
    विदितकंससहायजनोद्यमः॥ १ ॥

अयि सखे तव बालकजन्म मां
    सुखयतेऽद्य निजात्मजजन्मवत्।
इति भवत्पितृतां व्रजनायके
    समधिरोप्य शशंस तमादरात्॥ २ ॥

इह च सन्त्यनिमित्तशतानि ते
    कटकसीम्नि ततो लघु गम्यताम्।
इति च तद्वचसा व्रजनायको
    भवदपायभिया द्रुतमाययौ॥ ३ ॥

अवसरे खलु तत्र च काचन
    व्रजपदे मधुराकृतिरङ्गना।
तरलषट्पदलालितकुन्तला
    कपटपोतक ते निकटं गता॥ ४ ॥

सपदि सा हृतबालकचेतना
    निशिचरान्वयजा किल पूतना।
व्रजवधूष्विह केयमिति क्षणं
    विमृशतीषु भवन्तमुपाददे॥ ५ ॥

www.prapatti.com

ललितभावविलासहृतात्मभि-
र्युवतिभिः प्रतिरोद्धुमपारिता।
स्तनमसौ भवनान्तनिषेदुषी
प्रददुषी भवते कपटात्मने॥ ६ ॥

समधिरुह्य तदङ्कमशङ्कित-
स्त्वमथ बालकलोपनरोषितः।
महदिवाम्रफलं कुचमण्डलं
प्रतिचुचूषिथ दुर्विषदूषितम्॥ ७ ॥

असुभिरेव समं धयति त्वयि
स्तनमसौ स्तनितोपमनिस्वना।
निरपतद्भयदायि निजं वपुः
प्रतिगता प्रविसार्य भुजावुभौ॥ ८ ॥

भयदघोषणभीषणविग्रह-
श्रवणदर्शनमोहितवल्लवे।
व्रजपदे तदुरः स्थलखेलनं
ननु भवन्तमगृह्णत गोपिकाः॥ ९ ॥

भुवनमङ्गलनामभिरेव ते
युवतिभिर्बहुधा कृतरक्षणः।
त्वमयि वातनिकेतननाथ मा-
मगदयन् कुरु तावकसेवकम्॥ १० ॥

**********

www.prapatti.com